# Shri Kartavirya Arjuna Kavacha Stotra Mahamantrah

# શ્રીકાર્તવીર્યાર્જુનકવચસ્તોત્રમહામન્ત્રઃ

## Document Information

Text title : Shri Kartavirya Arjuna Kavacha Stotra Mahamantrah

File name : kArtavIryArjunakavachastotramahAmantraH.itx

Category : deities_misc, kavacha, mantra, stotra

Location : doc_deities_misc

Proofread by : Manish Gavkar

Description/comments : Thanjavur Sarasvati Mahal Series No. 568 kArtavIryArjuna-upAsanA paddhatiH

Latest update : October 28, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 28, 2025

*sanskritdocuments.org*

# શ્રીકાર્તવીર્યાર્જુનકવચસ્તોત્રમહામન્ત્રઃ

શ્રીઃ ॥

॥ શ્રીગણેશાય નમઃ ॥

ઉડ્ડામિરેશ્વરતન્ત્રોક્તમ્ ।
અસ્ય શ્રી કાર્તવીર્યાર્જુનકવચસ્તોત્રમહામન્ત્રસ્ય દત્તાત્રેયો ભગવાન્નૃષિઃ ॥

અનુષ્ટુપ્ છન્દઃ ॥

શ્રી કાર્તવીર્યાર્જુનો વિષ્ણુશ્ચક્રવર્તી દેવતા ॥

કૃતવીર્યો બીજમ્ ।
સહસ્રબાહુશ્શક્તિઃ ।
અવ્યાહૃતઃ કીલકમ્ ।
કાર્તવીર્યાર્જુનપ્રસાદસિદ્ધ્યે જપેવિનિયોગઃ ॥

ૐ રાજન્યચક્રવર્તિને અઙ્ગુષ્ટાભ્યાં નમઃ ।
વીરાય ચક્રવર્તિને તર્જનીભ્યાં નમઃ ।
શૂરાય ચક્રવર્તિને મધ્યમાભ્યાં નમઃ ।
માહિષ્મતીપતયે ચક્રવર્તિને અનામિકાભ્યાં નમઃ ।
રેવામ્બુલીલાસન્તૃપ્ત -પરિતૃપ્ત -દશાસ્ય -
ચક્રવર્તિને કનિષ્ટિકાભ્યાં નમઃ ।
કારાગૃહપ્રતિબન્ધિતદશાશ્ય ચક્રવર્તિને કરતલકરપૃષ્ટાભ્યાં નમઃ ।
રાજન્યચક્રવર્તિને હૃદયાય નમઃ ।
વીરાય ચક્રવર્તિને શિરસે સ્વાહા ।
શૂરાય ચક્રવર્તિને શિખાયૈ વષટ્ ।
માહિષ્મતીપતયે ચક્રવર્તિને કવચાય હુમ્ ।
રેવાબુલીલાસન્તૃપ્તપરિતૃપ્તદશાસ્યચક્રવર્તિને નેત્રત્રયાય વૌષટ્ ।
કારાગૃહપ્રતિબન્ધિતદશાસ્યચક્રવર્તિને અસ્ત્રાય ફટ્ ।

ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનં

સહસ્રબાહું સશરં સચાપં રક્તામ્બરં રત્નકિરીટકુણ્ડલમ્ ।
ચોરારિદુષ્ટભયનાશનમિષ્ટદં તં ધ્યાયેન્મહાબલવિજૃમ્ભિતકાર્તવીર્યમ્ ॥ ૧॥

અવ્યાત્સર્વભયાત્પ્રભાકરનિભઃ પ્રદ્યોતનો નૂતનઃ
સ્વર્ણસ્રક્ પરિવીતકન્ધરધરો રક્તાંશુકોષ્ણીષવાન્ ।
નાનાકલ્પવિભૂષણઃ કરસહસ્રાર્ધાત્તબાણાસનો
બાણર્ધાત્તસહસ્રબાહુરનિશં ભૂવલ્લભો નઃ પ્રભુઃ ॥ ૨॥

શ્રીદેવ્યુવાચ ।
દેવાદિદેવ સર્વજ્ઞ સર્વભૂતહિતે રત ।
કેન રક્ષા ભવેન્નૃણાં ભીતાનાં વિવિધાપદિ ॥

રાજચોરાદિ પીડાસુ શસ્ત્રાગ્નિવિષપાતને ।
મારિદુસ્સ્વપ્નપીડાસુ ગ્રહરોગભયેષુ ચ ॥

જ્વરાપસ્મારપીડાસુ સિંહવ્યાઘ્રનિપાતને ।
રાક્ષસ - અસુરવેતાલપિશાચપ્રેત-પાતને ॥ ૩॥

મહાભયે મહાનાશે મહાનાવગતેઽર્ણવે ।
મહામૃત્યુભયે ઘોરે મહાકલહસમ્ભવે ॥ ૪॥

કેનોપાયેન શાન્તિઃ સ્યાત્ સાધકાનાં મહેશ્વર ।
અનષ્ટદ્રવ્યરક્ષા ચ નષ્ટસ્ય પુનરાગમઃ ॥ ૫॥

સર્વાકર્ષણસઙ્ક્ષોભસર્વસંહનનં તથા ।
ભવત્યભીષ્ટદં નૃણાં કેન તદ્વદ મે શિવ ॥ ૬॥

ઈશ્વર ઉવાચ ।
શ◌ૃણુ ગુહ્યતમં દેવિ ગોપનીયં પ્રયત્નતઃ ।
અવાચ્યમપિ વક્ષ્યામિ તવ લોકહિતાય વૈ ॥ ૭॥

કવચં કાર્તવીર્યસ્ય સાઙ્ગાવરણકં ક્રમાત્ ।
સ્વમૂર્તિશક્તિમન્ત્રૌઘસહિતં ધ્યાનપૂર્વકમ્ ॥ ૮॥

સહસ્રાદિત્યસઙ્કાશે નાનારત્નસમુજ્જ્વલે ।
ભાસ્વદ્ધ્વજપતાકાઢ્યે તુરઙ્ગાયુતશોભિતે ॥ ૯॥

મહાસંવર્તક્રાન્તેમહારાજવિરાજિતે ।
સમુદ્ધૃતમહાચ્છત્રવિતાનિતવિયત્પથે ॥ ૧૦॥

નિક્વણત્કિઙ્કિણીજાલે ચલચ્ચામરમણ્ડિતે ।
મહારથ્યાવલયિતે સર્વાલઙ્કારશોભિતે ॥ ૧૧॥

મહાવરરથે દીપ્તે નાનાશસ્ત્રવિરાજિતે ।
સુસ્થિતં વિપુલોદારસહસ્રભુજમણ્ડલમ્ ॥ ૧૨॥

વામૈરુદારૈઃ કોદણ્ડાન્ દધાનમપરૈશ્શરાન્ ।
કિરીટહારમુકુટકેયૂરવલયાઙ્ગદૈઃ ॥ ૧૩॥

મુદ્રિકોદરબન્ધાદ્યૈઃ કાઞ્ચીનૂપુરકાદિભિઃ ।
ભૂષિતં વિવિધાકલ્પૈર્ભાસ્વરૈસ્સુવિરાજિતમ્ ॥ ૧૪॥

આબદ્ધકવચં વીરં સુપ્રસન્નાનનામ્બુજમ્ ।
ધનુર્જ્યાસિંહનાદેન કમ્પયન્તં જગત્ત્રયમ્ ॥ ૧૫॥

સર્વશત્રુક્ષયકરં સર્વવ્યાધિવિનાશનમ્ ।
સર્વસમ્પત્પ્રદાતારં વિજયશ્રીનિષેવિતમ્ ॥ ૧૬॥

સર્વસૌભાગ્યદં ભદ્રં ભક્તાનાં ભયનાશનમ્ ।
દિવ્યમાલ્યાનુલેપાઙ્ગં સર્વલક્ષણસંયુતમ્ ॥ ૧૭॥

રથનાગાશ્વપાદાતિવૃન્દમધ્યગમીશ્વરમ્ ।
વરદં ચક્રવર્તીનાં આદ્યં લોકૈકપાલકમ્ ॥ ૧૮॥

સભાનોદિતસાહસ્ર-સૂર્યેન્દુજ્વલનપ્રભમ્ ।
ઉદિતાદિત્યસઙ્કાશં કુણ્ડલદ્વયશોભિતમ્ ॥ ૧૯॥

મહાયોગબલૈશ્વર્યકીર્ત્યાક્રાન્તજગત્ત્રયમ્ ।
શ્રીમચ્ચક્રં હરેરંશાદવતીર્ણં મહાબલમ્ ॥ ૨૦॥

સમ્યગાત્માવિભેદેન ધ્યાત્વા રક્ષામુદીરયેત્ ।
દત્તાત્રેય ઋષિઃ પ્રોક્તોઽનુષ્ટુપ્છન્દઃ પ્રકીર્તિતમ્ ॥ ૨૧॥

કાર્તવીર્યાર્જુનો વિષ્ણુશ્ચક્રવર્તી ચ દેવતા ।
વિનિયોગશ્ચ રક્ષાર્થે સર્વત્ર પરિકીર્તિતઃ ॥ ૨૨॥

સર્વશત્રુવિનાશાય સર્વાર્થસ્ય ચ સિદ્ધયે ।
તસ્યૈવ મૂર્તયઃ પઞ્ચ ભાનુમત્કિરણોજ્જ્વલાઃ ॥ ૨૩॥

અગ્નીશાસુરવાયવ્યકોણેષુ હૃદયન્તિકાઃ ।
સર્વતસ્તુ જ્વલદ્રૂપા વરચર્માસિપાણયઃ ॥ ૨૪॥

અવ્યાહતબલૈશ્વર્યશક્તિસામાર્થ્યવિગ્રહાઃ ।
ક્ષેમઙ્કરીં શક્તિયુક્તઃચોરાણાં ચ વિભઞ્જનઃ ॥ ૨૫॥

પ્રાચીં દિશં રક્ષતુ મે બાણબાણાસનૈર્યુતઃ ।
શ્રીકરીશક્તિસહિતો મારીમદવિભઞ્જનઃ ॥ ૨૬॥

શરચાપધરઃ શ્રીમાન્ દિશં મે પાતુ દક્ષિણામ્ ।
મહાવશ્યકરી યુક્તો શત્રૂણાં મદભઞ્જનઃ ॥ ૨૭॥

મહેષુચાપધૃક્ પાતુ મમ પ્રાચેતસીં દિશમ્ ।
યશઃ કરી યશસ્કરો દૈત્યાનાં મદભઞ્જનઃ ॥ ૨૮॥

કોદણ્ડેષુધરસ્સૌમ્યાં દિશં મે પરિરક્ષતુ ।
પ્રજ્ઞાકરીયુતશ્ચાપઃબાણધૃક્ દુષ્ટશાસનઃ ॥ ૨૯॥

પરિરક્ષતુ માં સમ્યક્ સમ્યક્ વિદિશં ચાગ્નિદેવતામ્ ।
વિદ્યાકરી સમાયુક્તઃ સુમહાન્ દુષ્ટશાસનઃ ॥ ૩૦॥

પાતુ મે નૈરૃતીં ચાપબાણો વિદિશમીશ્વરઃ ।
ધનાકર્ષણસમાયુક્તો મહાદુરિતનાશનઃ ॥ ૩૧॥

ઇષ્વાસનેષુ દૃક્ પાતુ વિદિશો મમ વાયવીમ્ ।
આયુષ્કાર્યાયુતઃશ્રીમાન્ મહાભયવિનાશનઃ ॥ ૩૨॥

ચાપેષુધારીરૌવીં મે વિદિશં પરિરક્ષતુ ।
વિજયશ્રીયુતસ્સાક્ષાત્સાહસ્રારધરો વિભુઃ ॥ ૩૩॥

દિશમૂર્ધ્વામવતુ મે મહાભયવિભઞ્જનઃ ।
શઙ્ખભૃત્સુમહાશક્તિસ્સમ્ભૂતો મે ધરાં દિશમ્ ॥ ૩૪॥

પરિરક્ષતુ મે દુઃખધ્વાન્તસમ્ભેદભાસ્કરઃ ।
મહાશોભાશ્રયાયુક્તઃ સર્વદિક્ચક્રમણ્ડલઃ ॥ ૩૫॥

મહાયોગીશ્વરઃ પાતુ સર્વતો મમ પદ્મધૃક્ ।
એતશ્ચ કાર્તવીર્યસ્ય શુક્લમાલ્યાંશુકાવૃતાઃ ॥ ૩૬॥

પ્રધાનદેવતારૂપાઃ પૃથગ્વરરથસ્થિતાઃ ।

શક્તયઃ પદ્મહસ્તાશ્ચ નીલેન્દીવરસન્નિભાઃ ॥ ૩૭॥

શુક્લમાલ્યસુવસના લલિતાસ્તિલકોજ્વલાઃ ।
તત્પાર્શ્વદેવતાઃ સ્વસ્વવાહનાયુધભૂષણાઃ ॥ ૩૮॥

સ્વસ્વદિક્ષુ સ્થિતાઃ પાન્તુ મામિન્દ્રાદ્યા મહાબલાઃ ।
એતાસ્તસ્ય સમાખ્યાતાઃ સર્વાવરણદેવતાઃ ॥ ૩૯॥

સર્વતો માં સદા પાતુ સર્વશક્તિસમન્વિતાઃ ।
હૃદયે ચોદરે નાભૌ જઠરે ગુહ્યમણ્ડલે ॥ ૪૦॥

ઊરુયુગ્જાનુપાદેષુ મૂર્ધ્નિ ભ્રૂયુગલેઽપિ ચ ।
કર્ણાક્ષિનાસિકાજિહ્વાકણ્ઠબાહુયુગેષુ ચ ॥ ૪૧॥

દશબીજાત્મિકામન્ત્રાઃ યસ્ય સંવૃદ્દિદાયકાઃ ।
તેજોરૂપધરાઃ પાન્તુ વાઞ્છાપૂરસુરદ્રુમાઃ ॥ ૪૨॥

દશ ચાન્યે મહાવર્ણાઃ મન્ત્રરૂપા મહોજ્જ્વલાઃ ।
વ્યાપકત્વેન પાન્ત્વસ્માનાપાદતલમસ્તકમ્ ॥ ૪૩॥

કાર્તવીર્યઃ શિરઃ પાતુ લલાટં હૈહયેશ્વરઃ ।
સુમુખો મે મુખં પાતુ કર્ણૌ વ્યાપ્તજગત્ત્રયઃ ॥ ૪૪॥

સુકુમારો હનૂં પાતુ તાલૌ ભ્રુયુગલેપિ ચ ।
નયને પુણ્ડરીકાક્ષો નાસિકાં મે ગુણાકરઃ ॥ ૪૫॥

દન્તોષ્ટૌ તુ સદા પાતુ બ્રહ્મગેયઃ સનાતનઃ ।
સર્વશાસ્ત્રકલાધારો જિહ્વાં ચુબુકમવ્યયઃ ॥ ૪૬॥

દત્તાત્રેયપ્રિયઃ કર્ણૌ સ્કન્ધૌ રાજકુલેશ્વરઃ ।
ભુજૌ દશાસ્યદર્પઘ્નો હૃદયં મે મહાબલઃ ॥ ૪૭॥

કુક્ષૌ રક્ષતુ મે વિદ્વાન્ વક્ષઃ પરપુરઞ્જયઃ ।
કરૌ સર્વાર્થદઃ પાતુ કારાગ્રે ત્રિજગત્પતિઃ ॥ ૪૮॥

રેવામ્બુલીલાસન્તૃપ્તો જ્વરં મેઽભિરક્ષતુ ।
મહાવીરસ્તુ મે નાભિં પાર્શ્વૌ મે સર્વદુષ્ટહા ॥ ૪૯॥

સહસ્રભુજધૃક્ પૃષ્ટં સપ્તદ્વીપાધિપઃ કટિમ્ ।
ગુહ્યં જિતેન્દ્રિયઃ પાતુ સન્ધિં નો યોગવલ્લભઃ ॥ ૫૦॥

ઊરૂ માહિષ્મતીનાથ જાનુની વલ્લભો ભુવઃ ।
જઙ્ઘે વીરાધિપઃ પાતુ પાદૌ પાતુ મનોજવઃ ॥ ૫૧॥

પાતુ સર્વાયુધધરઃ સર્વાઙ્ગં સર્વસન્ધિષુ ।
સર્વદુષ્ટાન્તકઃ પાતુ ધાત્વષ્ટકકલેવરમ્ ॥ ૫૨॥

પ્રણાદિ દશજીવેશાન્ સર્વશિષ્ટેષ્ટદોઽવતુ ।
વશીકૃતેન્દ્રિયગ્રામો પાતુ સર્વેન્દ્રિયાણિ મે ॥ ૫૩॥

રોમકૂર્ચાનિ રાજેન્દ્રસ્ત્વચં મેઽસાધ્યવિગ્રહઃ ।
અસ્થિમાંસાદિકં પાતુ સર્વક્ષુદ્રનિવારકઃ ॥ ૫૪॥

અનુક્તમપિ ચ યત્સ્થાનં શરીરાન્તર્બહિશ્ચ યત્ ।
તત્સર્વં પાતુ મે સર્વલોકનાથેશ્વરેશ્વરઃ ॥ ૫૫॥

વજ્રાસારતરં ચેદં શરીરં કવચાવૃતમ્ ।
બાધાશતવિનિર્મુક્તમસ્તુ મે ભયવર્જિતમ્ ॥ ૫૬॥

યદ્વિદં કવચં દિવ્યમભેદ્યં હૈહયેશિતુઃ ।
વિચરામિ દિવારાત્રૌ નિર્ભયેનાન્તરાત્મના ॥ ૫૭॥

રાજમાર્ગે ભયે દુર્ગે માર્ગે ચોરાદિસઙ્કુલે ।
વિષમે વિપિને ઘોરે દાવાગ્નૌ ગિરિકન્ધરે ॥ ૫૮॥

સઙ્ગ્રામે શત્રુસમ્બાધે સિંહવ્યાઘ્રનિપાતને ।
ગહ્વરે સર્પસઙ્કીર્ણે દેશે ચોરગણાવૃતે ॥ ૫૯॥

સર્વસ્વહરણે પ્રાપ્તે પ્રાપ્તે પ્રાણસ્ય સઙ્કટે ।
નાના રોગજ્વરાવેશે પિશાચપ્રેતપાતને ॥ ૬૦॥

મારીદુઃસ્વપ્નપીડાસુ ક્લિષ્ટવિશ્વાસઘાતકે ।
શરીરે ચ મહાદુઃખે માનસે ચ મહાજ્વરે ॥ ૬૧॥

આધિવ્યાધિભયે વિઘ્ને માન્ત્રોપદ્રવકેઽપિ ચ ।
ન ભવેત્તુ ભયં કિઞ્ચિત્કવચેનાવૃતસ્ય મે ॥ ૬૨॥

આગન્તુકામાનખિલાનસ્મદ્વસ્તુ વિલુમ્પકાન્ ।
નિવારયતુ દોર્દણ્ડસહસ્રેણ મહારથઃ ॥ ૬૩॥

સ્વકરોદ્દૃતસાહસ્રપાશબન્ધાન્ સુદુર્જયાન્ ।
સંરુદ્ધગતિસામર્થ્યાન્ કરોતુ કૃતવીર્યજઃ ॥ ૬૪॥

સૃણીસહસ્રનિર્ભિન્નાન્સહસ્રશરખણ્ડિતાન્ ।
રાજચૂડામણિઃ ક્ષિપ્રં કરોત્વસ્મદ્વિરોધકાન્ ॥ ૬૫॥

ખડ્ગસાહસ્રદલિતાન્ સહસ્રમુસલાર્દિતાન્ ।
ચોરાદિદુષ્ટસર્વૌઘાન્ કરોતુ કમલેક્ષણઃ ॥ ૬૬॥

સ્વશઙ્ખનાદસન્ત્રસ્તાન્ સહસ્રારવિદારિતાન્ ।
કરોતુ દુષ્ટસત્વૌઘાન્ સાહસ્રારસ્સહસ્રધૃક્ ॥ ૬૭॥

કૃતવીર્ય સુતો રાજા સહસ્રભુજમણ્ડલઃ ।
અવતારો હરેસ્સાક્ષાત્પાલયેત્સકલં મમ ॥ ૬૮॥

કાર્તવીર્યાર્જુનો નામ રાજાબાહુસહસ્રવન્ ।
તસ્ય સંસ્મરણાદેવ હૃતં નષ્ટં ચ લભ્યતે ॥ ૬૯॥

ધનુઃ પઞ્ચશતં વામે દાક્ષિણે તાવતઃ શરાન્ ।
બિભ્રાણઃ કાર્તવીર્યોઽસૌ પાલયેત્સકલં મમ ॥ ૭૦॥

યદ્ ભવેલ્લોકરક્ષાર્થં અંશાચ્ચક્રં હરેર્વિભોઃ ।
તન્નમામિ મહાવીર્યમર્જુનં કૃતવીર્યજમ્ ॥ ૭૧॥

કાર્તવીર્ય મહાવીર્ય સર્વશત્રુવિનાશન ।
સર્વત્ર સર્વદા તિષ્ઠન્ ચોરાન્નાશય પાહિમામ્ ॥ ૭૨॥

ઉત્તિષ્ટ દુષ્ટદમન સપ્તદ્વીપૈકપાલક ।
ત્વામેવ શરણં પ્રાપ્તં સર્વાર્તાદ્રક્ષ પાહિમામ્ ॥ ૭૩॥

દુષ્ટઘ્ન કિં ત્વં સ્વપિષિ કિં તિષ્ટસિ ચિરાપદિ ।
પાહિ નઃ સર્વદા સર્વ ભયેભ્યઃ સ્વસુતાનિ ચ ॥ ૭૪॥

યે ચોરા વસુહર્તારો દુષ્ટા યે ચ હિંસ્રકાઃ ।
અન્તરાયકરા દુષ્ટાઃ છદ્મકાઃ યે દુરાત્મકાઃ ॥ ૭૫॥

દુર્હૃદો દુષ્ટભૂપાલા દુષ્ટામાત્યાશ્ચ ઘાતકાઃ ।
યે ચ કાર્યવિલુપ્તારો યે ખલાઃ પરિપન્થિનઃ ॥ ૭૬॥

સર્વસ્વહરણા યે ચ મહામાયાવિનોઽપિ યે ।
મહાક્લેશકરા મ્લેચ્છા દસ્યવો વૃષલાશ્ચ યે ॥ ૭૭॥

યે મહાગરદાતરો વઞ્ચકાઃ શસ્ત્રપાણયઃ ।

યે પાપા દુષ્ટકર્માણો દુઃખદા દુષ્ટબુદ્ધયઃ ॥ ૭૮॥

વ્યાજકાઃ કુપથાસક્તા યે ચ નાનાભયપ્રદાઃ ।
છિદ્રાન્વેષકરા નિત્યં યેઽસ્માન્બાધિતુમુદ્યતાઃ ॥ ૭૯॥

તે સર્વે કાર્તવીર્યસ્ય મહાશઙ્ખરવાદ્દ્રુતાઃ ।
સહસા વિલયં યન્તુ દૂરાદેવ વિમોહિતાઃ ॥ ૮૦॥

યે દાનવા મહાદૈત્યા યે યક્ષા યે ચ રાક્ષસાઃ ।
પિશાચા યે મહાસત્વા યે ભૂતા બ્રહ્મરાક્ષસાઃ ॥ ૮૧॥

અપસ્મારગ્રહા યે ચ યે ગ્રહા પિશિતાશિનઃ ।
મહાલોહિતભોક્તારો વેતાલા યે ચ ગુહ્યકાઃ ॥ ૮૨॥

ગન્ધર્વાપ્સરસસ્સિદ્ધાઃ યે ચ દેવાદિયોનયઃ ।
ડાકિન્યો ઘોણસાઃ પ્રેતા ક્ષેત્રપાલા વિનાયકાઃ ॥ ૮૩॥

મહાવ્યાઘ્રમુખાઃ ક્રૂરાઃ મહાતુરગમૂર્તયઃ ।
મહાવ્યઘ્રા મહામેષાઃ મહામહિષસન્નિભાઃ ॥ ૮૪॥

મહારાજો મહાસિંહઃ મહાભલ્લૂકસન્નિભાઃ ।
ઋક્ષવારાહશુનકવાનરાલૂકમૂર્તયઃ ॥ ૮૫॥

મહોષ્ટ્રખરમાર્જારસર્પગો વિષપુચ્છકાઃ ।
નાનારૂપમહાસત્વાઃ નાનાક્લેશસહસ્રધાઃ ॥ ૮૬॥

નાનારોગકરાઃ ક્ષુદ્રા નાનાવીર્યાઃ મહાબલાઃ ।
વાતકા પૈત્તિકા ઘોરાશ્શ્લેષ્મિકાસ્સાક્ષિપાતિકાઃ ॥ ૮૭॥

માહેશ્વરા વૈષ્ણવાશ્ચ વૈરિઞ્ચશ્ચ મહાજ્વરાઃ ।
સ્કાન્દા વૈનાયકાઃ ક્રૂરાઃ યે ચ મન્મથસંજ્ઞિકાઃ ॥ ૮૮॥

મહાશત્રુગ્રહા રૌદ્રા મહામારીમસૂરિકાઃ ।
એકાહ્નિકા દ્વ્યાહ્નિકાશ્ચ ત્ર્યાહ્નિકાશ્ચ મહાજ્વરાઃ ॥ ૮૯॥

સામાહિકાઃ પાક્ષિકાશ્ચ માસષાણ્માસિકાશ્ચ યે ।
સંવત્સરા દુર્નિવાર્યાઃ જ્વરાઃ પરમદારુણાઃ ॥ ૯૦॥

સ્વાપ્નિકાશ્ચ મહોત્પાતાઃ યે ચ દુઃસ્વપ્નજા ગ્રહાઃ ।
કૂષ્માણ્ડા ભૈરવા ભીમાઃ ઘોણસા નિધિવઞ્ચકાઃ ॥ ૯૧॥

ભ્રામકાઃ પ્રાણહન્તારો યે ચ બાલગ્રહાદયઃ ।
મનોબુદ્ધીન્દ્રિયહરાઃ સ્ફોટકાશ્ચ મહાગ્રહાઃ ॥ ૯૨॥

મહાશના બલિભુજો મહાકુણપભોજનાઃ ।
દિવાચરા રાત્રિચરાઃ યે ચ સન્ધ્યાસુ દારુણાઃ ॥ ૯૩॥

પ્રમત્તમપ્રમત્તં ચ યે માં બાધિતુમુદ્યતાઃ ।
તે સર્વે હૈહયેન્દ્રસ્ય ધનુર્મુક્તશરાર્દિતાઃ ॥ ૯૪॥

સહસ્રધા પ્રણશ્યન્તુ ભગ્નસત્વબલોદ્યમાઃ ।
યે સર્પા યે મહાનાગાઃ મહાગિરિવિલેશયાઃ ॥ ૯૫॥

કાલાવ્યાલા મહાદંષ્ટ્રા મહાજગરસંજ્ઞિકાઃ ।
અનન્તગુલિકાદ્યાશ્ચ દૃગ્વિષાશ્ચ મહાભયાઃ ॥ ૯૬॥

અનેકશતવર્ષાશ્ચ ખડ્ગપુચ્છાશ્ચ દારુણાઃ ।
મહાવિષજલૂકાશ્ચ વૃશ્ચિકા રક્તપુચ્છકાઃ ॥ ૯૭॥

આશીવિષાઃ કાલકૂટાઃ મહાહાલાહલાહ્વયાઃ ।
જલસર્પા જલવ્યાલા જલગ્રાહાશ્ચ કચ્છપાઃ ॥ ૯૮॥

મત્સ્યકા વિષપુચ્છા યે ચાન્યે જલનિવાસિનઃ ।
જલજા સ્થલજાશ્ચૈવ નાનાભેદકુલોદ્ભવાઃ ॥ ૯૯॥

યે ચ ષડ્બિન્દવો લૂતાઃ ભ્રમરાઃ શૂલપુચ્છકાઃ ।
સ્થાવરા જઙ્ગમાશ્ચૈવ કૃત્રિમાશ્ચ મહાવિષાઃ ॥ ૧૦૦॥

ગુપ્તા વિગુપ્તારૂપાશ્ચ ભૂષિકાઃ ગૃહગોધિકાઃ ।
કૃકલાસા કુલીરાશ્ચ યે ચાન્યે યાદસાં ગણાઃ ॥ ૧૦૧॥

સ્મરણા વિષમા ઘોરા મહોગ્રવિષસંજ્ઞિકાઃ ।
યેઽસ્માન્બાધિતુમિચ્છતિ શરીરપ્રાણનાશકાઃ ॥ ૧૦૨॥

તે સર્વે કાર્તવીર્યસ્ય ખડ્ગ-સાહસ્રસાદિતાઃ ।
દૂરાદેવ વિનશ્યન્તુ પ્રણષ્ટેન્દ્રિયમાનસાઃ ॥ ૧૦૩॥

મનુષ્યાઃ પશવો ઋક્ષાઃ વાનરાઃ વનગોચરાઃ ।
સિંહવ્યાઘ્રવરાહાશ્ચ માહિષા યે મહામૃગાઃ ॥ ૧૦૪॥

ગજાસ્તુરઙ્ગાટવ્યા રાસભાશ્શરભા બૃકાઃ ।
શુનકા વિપિનઃ શુમ્ભમાર્જારાઃ વિષલોમશાઃ ॥ ૧૦૫॥

શ‌ૃગાલાઃ શશકાઃ શ્યેનાઃ ગરુત્મન્તો વિહઙ્ગમાઃ ।
ભેરુણ્ડા વાયસાઃ ગૃધ્રા હંસાદ્યાઃ પક્ષિજાતયઃ ॥ ૧૦૬॥

ઉદ્ભિજાશ્ચાઽજાશ્ચૈવ સ્વેદજાશ્ચ જરાયુજાઃ ।
નાનાભેદકુલે જાતાઃ નાનાભૂતાઃ પૃથગ્વિધાઃ ॥ ૧૦૭॥

યેઽસ્માન્બાધિતુમુદ્યન્તિ સન્ધ્યાસુ ચ દિવાનિશિ ।
તે ક્ષિપ્રં કાર્તવીર્યસ્ય ચક્રસાહસ્રખણ્ડિતાઃ ॥ ૧૦૮॥

દૂરાદેવ વિનશ્યન્તુ વિનષ્ટગતિપૌરુષાઃ ।
યે ચાક્ષેપપ્રદાતારો દ્વેષ્ટારો યે વિદૂષકાઃ ॥ ૧૦૯॥

કૃત્યં યત્ર પ્રદાતારઃ કૂટમાયાવિનશ્ચ યે ।
મારણોચ્ચાટનોચ્ચાટુદ્વેષમોહનકારકાઃ ॥ ૧૧૦॥

વિશ્વસ્તઘાતકા દુષ્ટા યે ચ સ્વામિદ્રુહો નરાઃ ।
યે ચાતતાયિનો દુષ્ટા યે પાપા ગુપ્તહારિણઃ ॥ ૧૧૧॥

દાહોપઘાતગરલશસ્ત્રપાતનદુઃખદાઃ ।
ક્ષેત્રવિત્તાપહરણાઃ બન્ધનાદિ બહુપ્રદાઃ ॥ ૧૧૨॥

ઈતયો વિવિધાકારા યે ચાન્યે દુષ્ટજાતયઃ ।
પીડાકરા યે સતતં ક્ષુદ્રકા ઘ્નન્તિ સન્તતમ્ ॥ ૧૧૩॥

તે સર્વે કાર્તવીર્યસ્ય ગદાસાહસ્રચૂર્ણિતાઃ ।
દૂરાદેવ વિનશ્યન્તુ લયં યાન્તુ સહસ્રધા ॥ ૧૧૪॥

યે મેઘા યે મહાવર્ષાઃ યે વાતા યાશ્ચ વિદ્યુતઃ ।
યે મહાશનો યે દીપ્તાઃ યો નિર્ઘાતાઃ સુદારુણાઃ ॥ ૧૧૫॥

ઉલ્કાપાતાશ્ચ યે ઘોરાઃ યે મહોન્દ્રાયુધાદયઃ ।
અર્કેન્દુકુજસૌમ્યાશ્ચ ગુરુકાવ્યશનૈશ્ચરાઃ ॥ ૧૧૬॥

રાહુશ્ચ કેતવો ઘોરા નક્ષત્રરાશયસ્તથા ।
તિથયસ્સઙ્ક્રમા માસત્વયયનાયુગનાયકાઃ ॥ ૧૧૭॥

મન્વન્તરસ્સિદ્ધર્ષયો યોગસિદ્ધાઃ સદોજ્વલાઃ ।
વિધયો ઋગ્યજુઃસામાત્યથર્વાદ્યાશ્ચ વહ્નયઃ ॥ ૧૧૮॥

ઋતવો લોકપાલાશ્ચ પિતરો દેવસન્તતિઃ ।

વિદ્યાશ્ચૈવ ચતુઃષષ્ટિભેદોક્તા ભુવનત્રયે ॥ ૧૧૯॥

સેવન્તે કીર્તિતાસ્સર્વે યે ચાન્યેનાનુકીર્તિતાઃ ।
તે સન્તુ નઃ સદા સૌમ્યાઃ સર્વલોકસુખાવહાઃ ॥ ૧૨૦॥

અજ્ઞયા કાર્તવીર્યસ્ય યોગીન્દ્રસ્યામિતદ્યુતેઃ ।
કાર્તવીર્યાર્જુનો ધન્વી યોગીન્દ્રો હેહયેશ્વરઃ ॥ ૧૨૧॥

દત્તાત્રેયપ્રિયતમઃ સહસ્રભુજમન્ડલઃ ।
ચાપી ખડ્ગી રથી બાણી ચર્મવર્મી મહાબલઃ ॥ ૧૧૨॥

સુભગઃ સુમુખઃ શાન્તઃ ચક્રવર્તી ગુણાકરઃ ।
દશાસ્યદર્પહા રેવાલીલાતૃપ્તઃ સુદુર્જયઃ ॥ ૧૨૩॥

દુઃખહા ચોરદમનો રાજરાજેશ્વરઃ પ્રભુઃ ।
સર્વજ્ઞઃ સર્વગઃ શ્રીમાન્ સર્વશિષ્ટપ્રદઃ કૃતી ॥ ૧૨૪॥

રાજચૂડામણિર્યોગી સપ્તદ્વીપાધિનાયકઃ ।
વિજયી વિશ્રુતો વાગ્મી મહાગતિરલોલુપઃ ॥ ૨૫॥

યજ્વા વિપ્રપ્રિયો વિદ્વાન્ બ્રહ્મજ્ઞો યસ્સનાતનઃ ।
માહિષ્મતીપતિર્યોદ્ધા મહાકીર્તિર્મહાભુજઃ ॥ ૧૨૬॥

સુકુમારો મહાવીરો મારિઘ્નો મદિરેક્ષણઃ ।
શત્રુઘ્નઃ શાશ્વતઃ શૂરઃ શઙ્ખભૃદ્યોગવલ્લભઃ ॥ ૧૨૭॥

મહાભાગવતો ધીમાન્ મહાભયવિનાશનઃ ।
અસાધ્યવિગ્રહો દિવ્યો ભયવ્યાપ્તજગત્ત્રયઃ ॥ ૧૨૮॥

સર્વશાસ્ત્રકલાધારો વિરજો લોકવન્દિતઃ ।
વીરો મલિનચિત્તાઢ્યો મહાબલપરાક્રમઃ ॥ ૧૨૯॥

વિજયશ્રીમયો માન્યો જિતારિર્મન્ત્રનાયકઃ ।
ખડ્ગભૃત્કામદઃ કાન્તઃ કાલઘ્નઃ કમલેક્ષણઃ ॥ ૧૩૦॥

ભદ્રવાદાપ્રિયો વૈદ્યો વરદો વિબુધો વશી ।
જિતેન્દ્રિયો જિતારાતિઃ સ્વચ્છન્દોઽનન્તવિગ્રહઃ ॥ ૧૩૧॥

ચક્રભૃત્પરચક્રઘ્નઃ સઙ્ગ્રામવિધિપૂજિતઃ ।
મહાધનો નિધિપતિર્મહાયોગી ગુરુપ્રિયઃ ॥ ૧૩૨॥

યોધાદ્યો સર્વરોગઘ્નો રાજિતાખિલભૂષણઃ ।
દિવ્યાસ્ત્રવિદમેયાત્મા સર્વગોપ્તા મહોજ્વલઃ ॥ ૧૩૩॥

સર્વાયુધધરોઽભીષ્ટપ્રદઃ પરપુરઞ્જયઃ ।
યોગસિદ્ધો મહાકાયો મહાબૃન્દશતાધિપઃ ॥ ૧૩૪॥

સર્વજ્ઞાનનિધિસ્સર્વભોગદાનકૃતોદ્યમઃ ।
ઇત્યષ્ટશતનામોક્તા મૂર્તયો દશદિક્પતેઃ ॥ ૧૩૫॥

સમ્યક્દશદિશો વ્યાપ્ય પાલયન્તુ ચ માં સદા ।
સર્વેન્દ્રિયાણિ સુસ્થાનિ સુશાન્તિશ્ચ સદાસ્તુ મે ॥ ૧૩૬॥

શિષ્ટાયામૂર્તયોષ્ટૌ ચ વિક્રમેણૈવ ભાસ્વરાઃ ।
અગ્નિનિરૃતિવાય્વીશકોણગાઃ પાન્તુ માં સદા ॥ ૧૩૭॥

મનસ્સૌખ્યમસમ્બાધામરોગમપરાજિતમ્ ।
દુઃખહા નિરવિઘ્નશ્ચ પ્રજાવૃદ્ધિસ્સુખોદયઃ ॥ ૧૩૮॥

વાઞ્છાવાપ્તિશ્ચ કલ્યાણં અવૈષમ્યમનામયમ્ ।
અનષ્ટદ્રવ્યરક્ષા ચ નષ્ટસ્ય પુનરાગમઃ ॥ ૧૩૯॥

ધર્માયુષ્યં યશોલાભસ્સૌકુમાર્યમભીપ્સિતમ્ ।
અનાલસ્યમભીષ્ટં ચ મૃત્યુહાનિર્બલોન્નતિઃ ॥ ૧૪૦॥

ભયહાનિઃ યશઃ કાન્તિર્વિદ્યાવૃદ્ધિર્મહાશ્રયઃ ।
અપ્રધૃષ્યં મહત્વં ચ મહાસામર્થ્યકોવિદઃ ॥ ૧૪૧॥

સન્તુ મે કાર્તવીર્યસ્ય હૈહયેન્દ્રસ્ય કીર્તનાત્ ।
ય ઇદં કાર્તવીર્યસ્ય કવચં પુણ્યવર્ધનમ્ ॥ ૧૪૨॥

સર્વપાપપ્રશમનં સર્વોપદ્રવનાશનમ્ ।
સર્વસમ્પત્કરં ગુહ્યં સમસ્તભયનાશનમ્ ॥ ૧૪૩॥

વિજયાર્થપ્રદં નૃણાં સર્વસમ્પત્કરં શુભમ્ ।
શ્રુણુયાદ્વા પઠેદ્વાઽપિ સર્વાન્કામાનમાપ્નુયાત્ ॥ ૧૪૪॥

આયુરારોગ્યમૈશ્વર્યપુત્રપૌત્રાદિસમ્પદઃ ।
ભવન્તિ સર્વદાઽભીષ્ટાઃ પુસ્તકસ્યાપિ પૂજનાત્ ॥ ૧૪૫॥

મુચ્યતે સર્વદુઃખૈસ્તુ સર્વત્ર વિજયી ભવેત્ ।
મારીચોરાદિપીડાદ્યૈર્ન કદાચિત્પ્રબાધ્યતે ॥ ૧૪૬॥

પઠતઃ પ્રાતરુત્થાય દુઃસ્વપ્નાદિ વિનશ્યતિ ।
લભતે વાઞ્છિતાનર્થાન્ પૂજ્યતે ત્રિદશૈરપિ ॥ ૧૪૭॥

શય્યાતલગતો રાત્રૌ ચ ઇદં કવચં પઠેત્ ।
ન તસ્ય તસ્કરારાતિઃ દુઃસ્વપ્નાદિભવં ભયમ્ ॥ ૧૪૮॥

ચોરૈર્યદાહૃતં પશ્યેત્પશ્ચાદિ ધનમાત્મનઃ ।
એકવારં જપેદ્યસ્તુ સર્વાભીષ્ટફલપ્રદમ્ ॥ ૧૪૯॥

સપ્તવારં તથા જપ્ત્વા નિશિ પશ્ચિમદિઙ્મુખઃ ।
સપ્તરાત્રેણ લભતે નષ્ટદ્રવ્યં ન સંશયઃ ॥ ૧૫૦॥

સપ્તવિંશતિ વારં તુ પ્રાચીદિગ્વદનો યદિ ।
તદા દેવાસુરયુતં પરચક્રં નિવારયેત્ ॥ ૧૫૧॥

વિવાદે વિપુલે ઘોરે પઞ્ચવારં પઠેદિમ્ ।
વિજયો જાયતે તસ્ય ન કદાચિત્પરાજયઃ ॥ ૧૫૨॥

સમ્યક્ દ્વાદશધા રાત્રૌ પ્રજપેદ્બાધમુક્તયે ।
ત્રિદિનાન્નિગલગ્રસ્તો મુચ્યતે ન વિચારણા ॥ ૧૫૩॥

અનેનૈવ વિધાનેન સર્વસાધનકર્મણિ ।
અસાધ્યમપિ સપ્તાહાત્સાધયેન્મન્ત્રવિત્તમઃ ॥ ૧૫૪॥

યાત્રાકાલે પઠિત્વેદં માર્ગં ગચ્છતિ યઃ પુમાન્ ।
ન દુષ્ટચોરવ્યાઘ્રાદ્યૈઃ ભયં સ્યાત્પરિપન્થિનઃ ॥ ૧૫૫॥

નિત્યં ગ્રહગતો જિત્વા કલ્યાણૈઃ પરિપૂર્યતે ।
ન ભયં જાયતે તસ્ય દુષ્ટસત્વાદિભિઃ ક્વચિત્ ॥ ૧૫૬॥

સર્વરોગપ્રપીડાસુ ત્રિધા વા પઞ્ચધા પઠેત્ ।
સરોગમૃત્યુવેતાલભૂતપ્રેતૈઃ પ્રમુચ્યતે ॥ ૧૫૭॥

પઠનાત્સ્મરણાત્કુર્યાજ્જલેનાઞ્જલિના રવૌ ।
સ ચાગ્નિવિષકૃત્યાસુ રોગસ્ફોટૈર્ન બાધ્યતે ॥ ૧૫૮॥

ત્રિસન્ધ્યાસુ પઠેદેતત્ ષણ્માસં વિજિતેન્દ્રિયઃ ।
કાલમૃત્યુમપિ પ્રાપ્તં જયત્યત્ર ન સંશયઃ ॥ ૧૫૯॥

પઠતઃ કવચં ચેદં વિષં નાક્રમતે તનૌ ।

જડાન્ધત્વં ચ મૂકત્વં નોપસર્ગભયં ક્વચિત્ ॥ ૧૬૦॥

વિંશદ્વર્ણોક્તવિધિના ધાર્યેદેવં તદાત્મકમ્ ।
મન્ત્રી ગુરુપ્રસાદાત્તં મન્ત્રરાજં જપેત્પુનઃ ॥ ૧૬૧॥

કવચેનાવૃતો ભૂયો મન્ત્રધ્યાનં સમાચરેત્ ।
યથોક્તં લભતે સદ્યઃ ફલં વજતનુર્ભવેત્ ॥ ૧૬૨॥

યથા તથેદં કવચં ન કસ્યાપિ પ્રકાશયેત્ ।
આદૌ સંશોધનં કૃત્વા તન્નામ ધ્યાનપૂર્વકમ્ ॥ ૧૬૩॥

સિદ્ધ્યૈ તચ્ચક્રમન્ત્રાણાં ઉચ્ચરેત્ દ્વિજપૂર્વકમ્ ।
ગોપનીયં પ્રયત્નેન શિવસ્ય વચનં તથા ॥ ૧૬૪॥

સુભક્તાય સુશિષ્યાય દદ્યાત્સર્વસ્વદાયિને ।
સાધકાનાં હિતાર્થાય યદુક્તં ચન્દ્રમૌલિના ॥ ૧૬૫॥

કાર્તવીર્યસ્ય કવચં યદુક્તં વૈ મયા તવ ।
યેનૈદં રક્ષતો દેહઃ કાલેનાપિ ન જીર્યતિ ॥ ૧૬૬॥

તસ્માત્સર્વપ્રયત્નેન કવચં ધારયેત્સુધીઃ ।

॥ ઇતિ શ્રીકાર્તવીર્યાર્જુનકવચસ્તોત્રમહામન્ત્રઃ સમ્પૂર્ણઃ ॥

Note:

This is similar to kArtavIryakavachakathanam from
from bRRihannAradIyapurANa . pUrvabhAga . adhyAya 77

Proofread by Manish Gavkar

*Shri Kartavirya Arjuna Kavacha Stotra Mahamantrah*

pdf was typeset on October 28, 2025

Please send corrections to *sanskrit@cheerful.com*